# A-II/1/1390/22

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. रत्नकरण्डश्रावकाचारस्य मंगलाचरणं लिखत।
2. रत्नकरण्डश्रावकाचारस्य कर्ताः कोऽस्ति?
3. धर्मस्य स्वरूपं लिखत।
4. देवस्य स्वरूपं लिखत।
5. सम्यग्दर्शनस्य लक्षणं लिखत।
6. मूढतायाः लक्षणं लिखत।
7. शास्त्रस्य लक्षणं लिखत।
8. निःकांक्षितांगस्य लक्षणं लिखत।
9. दर्शन मोहस्य स्वरूपं लिखत।

**अथवा**

लोकमूढतायाः स्वरूपं लिखत।

10. करणानुयोगस्य लक्षणं लिखत।

**अथवा**

चरणानुयोगस्य लक्षणं लिखत।

11. अनर्थदण्डव्रतस्य लक्षणं लिखत।

**अथवा**

गुणव्रतस्य स्वरूपं लिखत।

12. तत्त्वस्य लक्षणं लिखत।

**अथवा**

शल्यस्य स्वरूपं लिखत।

13. अतिचारस्य लक्षणं लिखत।

14. अणुव्रतस्थलक्षणं लिखत।

15. कः तपस्वी प्रशस्यते।

**अथवा**

धर्मेश्वराः के भवितुमर्हन्ति।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. "न धर्मोधार्मिकैर्विना" व्याख्यां लिखत।

17. सम्यग्दर्शनस्य महत्त्वं स्पष्टयत।

18. आप्तेनोत्सिन्न दोषेण सर्वज्ञेनागमेशिना।

भवित्यं नियोगेन नान्यथा ह्याप्तता भवेत्॥

**अथवा**

अमरासुरनरपतिभिर्यमधर-पतिभिश्चनूत पादाम्भोजाः।

दृष्टया सुनिश्चितार्थाः वृषचक्रधराः भवन्ति लोकशरण्याः॥ -व्याख्या विधेया।

19. पाठ्यग्रन्थानुसारेण चतुरनुयोगेषु निबद्धं ज्ञानं समीक्षणीयम्।

**अथवा**

ऋद्धेः स्वरूपं प्रतिपादयत।

20. श्रावकस्य सल्लेखना भवितुमर्हति न वेति समीक्षत।

**अथवा**

ग्रन्थकारस्य परिचयं लिखत।

**स. अधोलिखितेषु विषयमेकमादाय निबन्धो लेखनीयः।** **(1×20=20)**

21. रत्नकरण्डश्रावकारग्रन्थस्य विषयवस्तू विशदयत।

**अथवा**

प्रतिमायाः स्वरूपं लिखत।

**अथवा**

मोक्षस्य स्वरूपं प्रतिपादयत।

# A-II/2/1391/22

## तृतीयसत्राऽर्द्धम्

## द्वितीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'समयसारः' अस्य पदस्य कः अर्थः वर्तते ?
2. समयसारग्रन्थः केन आचार्येण लिखितः ?
3. मङ्गलाचरणे ग्रन्थकारः कं नमति ?
4. 'चुक्केज्ज छलं ण घेत्तत्वं' अस्यार्थं लिखत।
5. व्यवहारनयः भूतार्थो वा अभूतार्थो वा ?
6. शुद्धनयस्य किं स्वरूपं वर्तते ?
7. जिनशासनं कः जीवः पश्यति ? ग्रन्थानुसारेण लिखत।
8. जीवः कदा पर्यन्तम् अज्ञानी अप्रतिबुद्धो वा भवति ?
9. कः साधुः जितमोहः भवति ?
10. कर्म कतिविधम् अस्ति ? नामानि लिखत।
11. निश्चयनयेन वर्णादयः जीवस्य सन्ति न वा ?

**अथवा**

'जो सुयणाणं सव्वं जाणइ' अस्यार्थं लिखत।

12. द्वीन्द्रियजीवाः के भवन्ति ?

**अथवा**

'अहमेक्को खलु सुद्धो दंसणणाणमइयो सदाडरुवी' अस्याः गाथायाः अर्थं स्पष्टयत।

13. जीवस्य स्वरूपं ग्रन्थदिशा लिखत ?

**अथवा**

'ववहारणयो भासदि, जीवो देहो य हवदि खलु इक्को' अस्यार्थं लिखत।

14. 'अहमेदं एदमहं अहमेदस्सेव होमि मम एदं' अस्य गाथांशस्य अर्थं लिखत।

**अथवा**

त्रीन्द्रियजीवाः के सन्ति ?

15. 'समय' शब्दस्य कः अर्थः वर्तते ?

**अथवा**

समयस्य के-के भेदाः सन्ति ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कुन्दकुन्दाचार्यस्य व्यक्तित्वं कृतित्वञ्च वर्णयत।

17. शुद्धजीवस्य किं स्वरूपम् आचार्येण प्रोक्तम् ?

18. निश्चयव्यवहारनयौ ग्रन्थदिशा स्पष्टयत।

**अथवा**

ण वि होदि अप्पमेत्तो, ण पमत्तो जाणओ दुजो भावो।

एवं भणंति सुद्धं णाओ जो सो उ सो चेव॥ -अस्याः गाथायाः व्याख्या कार्या।

19. एकस्याः गाथायाः व्याख्यां कुरुत -

(क) भूयत्थेणाभिगदा जीवाजीवा य पुण्यपावं च।

आसवसंवरणिज्जरबंधो मोक्खो य सम्मत्तं॥

(ख) दंसणणाण चरित्राणि सेविदव्वाणि साहुणा णिच्चं।

ताणि पुण जाण तिण्णिवि अप्पाणं चेव णिच्छयदो॥

20. एकस्याः गाथायाः व्याख्या कार्या-

(क) ववहारेणुवदिस्सइ णाणिस्स चरित्तदंसणं णाणं।

णवि णाणं च चरित्तं ण दंसणं जाणगो सुद्धो॥

**अथवा**

(ख) सुद्धो सुद्धादेसो, णायव्वो परमभावदटिसीहिं।

ववहारदेसिदा पुण, जे दु अपरमे ट्ठिदा भावे॥

**स. अधोलिखितेषु विषयेषु कमप्येकं स्वीकृत्य निबन्धः लेखनीयः।** **(1×20=20)**

21. पाठ्यग्रन्थस्य जीवाजीवाधिकारस्य सारांशं विस्तरेण वर्णयत।

**अथवा**

समयसारग्रन्थस्य महत्त्वं लिखित्वा ग्रन्थकारस्य अन्यान् ग्रन्थान् अपि सूचयत।

# A-II/3/1392/22

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. अतिलघूत्तरीयाः प्रश्नाः।** **(15×2=30)**

1. स्यात् शब्दस्य कोऽर्थः?
2. धर्मस्य स्वरूपं किमस्ति?
3. अनन्तसुखेन किं तात्पर्यम्?
4. आप्तस्य लक्षणं लिखत।
5. कुतीर्थिकाः कोऽस्ति?
6. सर्वज्ञस्य स्वरूपं लिखत।
7. नैयायिकमतस्य प्रवर्तकः कोऽस्ति?
8. वैशेषिकमते कति पदार्थः स्वीकृतः?
9. समवायस्य लक्षणं किमस्ति।
10. 'सत्' शब्दस्य लक्षणं लिखत।
11. "स्वयंभूमसम्बुद्धत्व" इत्यनेन किं तात्पर्यम्।

**अथवा**

अन्ययोगत्व्यवच्छेदस्य लक्षणं किम्?

12. संयोगसम्बन्धः कुत्र भवति?

**अथवा**

हितोपदेशकः कोऽस्ति?

13. दीपके नित्यतानित्यता कथं सिद्धाः जाताः।

**अथवा**

पदार्थान् एकान्तनित्यः क्व स्वीकरोति?

14. अर्थक्रियाया: लक्षणं लिखत।

**अथवा**

"अर्थक्रियाकारित्वं" कस्य लक्षणं अस्ति?

15. क्षणिकभावेन सह देशकालस्य व्याप्ति: संभवति न वा?

**अथवा**

क्षणिकपदार्थे अर्थक्रिया संभवति न वा।

**ब. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।** **(5×6=30)**

16. मंगलाचरणस्य महत्त्वं प्रतिपादनीयम्।

17. "श्रीवर्धमानं जिनाप्तमुख्यं" व्याख्या विधेय:।

18. ग्रन्थानुसारेण स्याद्वादस्य स्वरूपं लिखत।

**अथवा**

जैनदर्शने पदार्थं व्यवस्थां लिखत।

19. उर्मिषट्कं किं? विवेच्यताम्।

**अथवा**

न्यायदर्शने पदार्थव्यवस्थां लिखत।

20. वैशेषिकमते ईश्वरस्य स्वरूपं लिखत।

**अथवा**

वैशेषिकमते पदार्थव्यवस्थां लिखत।

**स. निबन्धात्मक प्रश्ना:।** **(1×20=20)**

21. नैयायिकमते ईश्वरस्य स्वरूपं प्रतिपादनीयम्।

**अथवा**

जैनदर्शने सर्वज्ञस्य स्वरूपं ग्रन्थानुसारेण लिखत।

# A-II/4/1393/22

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'नो णः' इति सूत्रस्य कः अर्थः?
2. 'पावं' इत्यस्य संस्कृतरूपं किम्?
3. 'खघथधभाम्' इति सूत्रं कस्मिन् पादे अस्ति?
4. 'अवर्णो य श्रुतिः' इति सूत्रस्य अर्थं लिखत।
5. 'पोवः' इति सूत्रस्य कः अर्थः?
6. 'तित्थअरो' इत्यस्य संस्कृतरूपं किं भवति?
7. 'द्वितीयातृतीययोः सप्तमी' इति सूत्रस्य अर्थं लिखत।
8. पाठ्यग्रन्थस्य प्रथमपादे कति सूत्राणि सन्ति?
9. 'वड्ढमाणं' इत्यस्य संस्कृतरूपं किं भवति?
10. 'पुष्पम्' इत्यस्य शब्दस्य प्राकृतरूपं किमस्ति?
11. 'मरहट्ठं' इति शब्दस्य संस्कृतरूपं लिखत।

**अथवा**

'मिरायाम्' इति सूत्रस्य अर्थं लिखत।

12. 'प्रथमम्' इत्यस्य प्राकृतरूपं लिखत।

**अथवा**

'रत्तनी' शब्दस्य संस्कृतरूपं किम्?

13. 'आइरियो' इत्यस्य शब्दस्य संस्कृतरूपं किं भवति?

**अथवा**

प्राकृते सन्धि-विधायकं सूत्रं लिखत।

14. 'तेरह' इत्यस्य शब्दस्य संस्कृतरूपं किम्?

**अथवा**

'लुक्' इति सूत्रस्य अर्थं लिखत।

15. 'हिअयं' इति शब्दस्य संस्कृतरूपं लिखत।

**अथवा**

'कर्म' इति शब्दस्य प्राकृतरूपं किम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. 'अथ प्राकृतम्' इति सूत्रं स्वभाषया व्याख्यात।

17. 'अनादौ शेषादेशयोर्द्वित्वम्' इति सूत्रं वर्णयत।

18. 'पदयोः सन्धिर्वा' इति सूत्रं विशदयत।

**अथवा**

'स्त्रियामादविद्युतः' इति सूत्रं सोदाहरणं विवेचयत।

19. प्राकृतभाषायाः प्राचीनत्वं वर्णयत।

**अथवा**

'प्रत्यादौ डः' इत्यस्य सूत्रस्य व्याख्या कार्या।

20. शौरसेनीभाषायाः विशिष्टतां वर्णयत।

**अथवा**

'कगचजतदपयवां प्रायो लुक्' इति सूत्रं वर्णयत।

**स. दीर्घोत्तरीयः एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. ग्रन्थकारहेमचन्द्रसूरिवर्यस्य व्यक्तित्वं कृतित्वञ्च वर्णयत।

**अथवा**

पाठ्यग्रन्थस्य प्रथमपादस्य सारांशः लेखनीयः।

# A-II/5/1394/22

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. जैनधर्मस्य आदिप्रवर्तकः कः विलसति ?
2. 'दिगम्बर' शब्दस्य कः अर्थः ?
3. जैनशास्त्राणां प्रमुखा भाषा का वर्तते ?
4. कुन्दकुन्दाचार्यस्य समयः कः वर्तते ?
5. तत्त्वार्थसूत्रकारः कः आचार्यः अस्ति ?
6. भगवतः महावीरस्य निर्वाणानन्तरं प्रथमश्रुतकेवली कः आसीत् ?
7. भगवतः महावीरस्य पञ्च नामानि लिखत।
8. सिद्धहेमशब्दानुशासनं केन आचार्येण लिखितम् ?
9. समन्तभद्राचार्यस्य ग्रन्थानां नामानि लिखत।
10. तत्त्वार्थसूत्रग्रन्थस्य टीकाग्रन्थस्य नाम लिखत ?
11. प्रवचनसारग्रन्थः कस्य आचार्यस्य कृतिः वर्तते ?

**अथवा**

एकस्य न्यायग्रन्थस्य जैनमतस्य नाम लिखत।

12. तत्त्वार्थसूत्रस्य मङ्गलाचरणं लिखत।

**अथवा**

आचार्यस्य अनन्तवीर्यस्य समयः कः ?

13. 'कार्तिकेयानुप्रेक्षा' ग्रन्थस्य कर्ता कः ?

**अथवा**

गुणधराचार्यस्य समयः कः ?

14. दिगम्बरपरम्परायाः शास्त्राणि कस्यां प्राकृतभाषायां निबद्धानि सन्ति?

**अथवा**

श्रुतलेखनपरम्परा कस्मात् कालादारब्धा?

15. दिगम्बरश्वेताम्बरसम्प्रदायभेदः कदा जातः?

**अथवा**

प्राकृतभाषायाः कामपि एकां गाथां लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. तत्त्वार्थसूत्रग्रन्थस्य प्रतिपाद्यविषयं वर्णयत।

17. अकलङ्काचार्यस्य रचनासहितं परिचयं लिखत।

18. आप्तमीमांसायाः तत्त्वविषयं विशदयत।

**अथवा**

'समराइच्चकहा' इति ग्रन्थस्य परिचयं लिखत।

19. हेमचन्द्राचार्यस्य जैनसाहित्ये किम् अवदानम्?

**अथवा**

पञ्चास्तिकायग्रन्थस्य महत्त्वं स्पष्टयत।

20. जैनसाहित्यस्य सूत्रग्रन्थानां परिचयः लेखनीयः।

**अथवा**

दिगम्बरश्वेताम्बरसम्प्रदाययोः शास्त्रेषु किं भिन्नत्वं वर्तते?

**स. अधोलिखितेषु विषयेषु कमप्येकं स्वीकृत्य निबन्धः लेखनीयः।** **(1×20=20)**

21. कुन्दकुन्दाचार्यस्य कृतित्वं व्यक्तित्वञ्च विस्तरेण विशदयत।

**अथवा**

समन्तभद्राचार्यस्य रचनासहितं परिचयं विस्तरेण लिखत।